इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

दिनाङ्क :- 23.05.2025 सायम् :- 06:20

<u>आदौ-मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्र-मोदी द्विरूक्तवान् यत् तदीयं प्रशासनम् आतङ्कवादम् अशान्ति-प्रसारकान् माओवादि-तत्त्वान् च विरुध्य शून्य-सहिष्णुतायाः नीतौ कार्यम् आचरति। प्रधानमन्त्रिणा अद्य नवदिल्ल्यां राइजिंग नॉर्थ ईस्ट इन्वेस्टर्स सम्मिट इत्येतस्य उद्घाटनम् कृतम्।
- विदेश-मन्त्रिणा डॉ. एस. जयशङ्करेण उक्तं यत् भारतेन गोलिकाप्रहार-सैन्य-कार्याचरणयोः स्थगन-सहमतेः माध्यमेन पाकिस्तानेन सह सङ्घर्षः सम्प्रति समासाधितः।
- ऋतु विभागेन श्व: पर्यन्तं कोंकणे गोवायां च अतिवृष्टे: अनुमानम् व्यक्तम्।
- बैडमिण्टन् क्रीडायां मलेशिया मास्टर्स इति स्पर्धायां भारतस्य किदाम्बी श्रीकान्त: पुरुषैकल वर्गे उपान्त्य चक्रे प्रविष्ट:।

<u>प्रधानमन्त्री पूर्वोत्तरम्</u>

प्रधानमन्त्री नरेन्द्र-मोदी प्रावोचत् यत् तदीयं प्रशासनम् आतङ्कवादम् अशान्ति-प्रसारकान् माओवादि-तत्त्वान् च विरुध्य शून्य-सहिष्णुतायाः नीतौ कार्यम् आचरति। अद्य राजधान्यां नवदिल्ल्यां राइजिंग नॉर्थ ईस्ट इन्वेस्टर्स सम्मिट इत्येतस्य उद्घाटनावसरे श्रीमोदिनोक्तं यत् विकसित-भारतस्य निर्माणाय देशस्य पूर्वोत्तर-क्षेत्रस्य विकासः नितराम् आवश्यकः।

बाइट- पी.एम. ऑन नॉर्थ इस्ट शांति - 35 से.

प्रधानमन्त्री अवोचत् यत् एकस्मिन् समये पूर्वोत्तरं केवलं सीमान्तक्षेत्रमति उच्यते स्म। प्रधानमन्त्रिणा स्वीकृतं यत् पूर्वोत्तर-क्षेत्रेण अतीतकाले बहूनि समाह्वानानि सम्मुखीकृतानि, परम् इदानीं तत् क्षेत्रम् अवसराणां भूमिरूपेण उदीयते। श्रीमोदिना शिखर-सम्मेलने उद्योग-जगतः प्रमुखजनानाम् उपस्थितिः श्लाघिता। प्रोक्तं च यत् क्षेत्रे उपलब्धावसराणि आदाय उत्साहस्य परिवेशो वर्तते। अस्मिन् अवसरे पूर्वोत्तर-क्षेत्र-विकास-मन्त्री ज्योतिरादित्य-सिन्धिया अवोचत् यत् केन्द्र-प्रशासनेन पूर्वोत्तर-क्षेत्रे आधारभूत-संरचनां सम्पर्कं च समेधितुं बहु-कार्यं कृतम्।

<u>जयशङ्कर-डेनमार्क</u>

विदेश-मन्त्रिणा डॉ. एस. जयशङ्करेण उक्तं यत् भारतेन गोलिकाप्रहार-सैन्य-कार्याचरणयोः स्थगन-सहमतेः माध्यमेन पाकिस्तानेन सह सङ्घर्षः सम्प्रति समासाधितः। डेनमार्क-स्य वार्ताभिकरणेन सह साक्षात्कारे डॉ. जयशङ्करेण प्रोक्तं यत् पाकिस्तानं विरुध्य भारतस्य काठोर-कार्याचरणेन एतत् सम्भवम् अभूत् ।विदेशमन्त्री डॉ. एस जयशंकर: जर्मनस्य चांसलरेण फेडरिक मर्जेण सह बर्लिने अमिलत्। जयशंकर: प्रधानमन्त्रिण: नरेन्द्र मोदिन: शुभकामना: मर्जाय प्रायच्छत्।

<u>अमित शाह:-</u>

केन्द्रीय गृह-मंत्री अमित शाह: प्रावोचत् यत् सिंदूराभियानं पहलगाम- आक्रमणस्य उत्तरमस्ति। अपि च अद्य विश्वं भारतीय- सशस्त्र-बलानां वीरताया: प्रशंसा कुर्वदस्ति। श्रीशाह: प्रोक्तवान् यत् प्रशासनस्य सुदृढया राजनीतिक-इच्छा शक्त्या गुप्त-समवायानां प्रमाणिक-सूचनाभि: तथा सशस्त्र-बलानां घातकै-क्रियान्वयनै: च सम्भवम् अभवत् इदं कार्यम्।

न्यू अमित शाह ऑन वर्ड- 33 से.

अद्य नवदिल्यां सीम-सुरक्षा-बलस्य अलंकरण-समारोहं संबोधयन् श्रीशाह: प्रोक्तवान् यत् बी.एस.एफ इति सीम-सुरक्षा-बलेन सशस्त्र-बलेन च पाकिस्तानं प्रति भारतस्य उत्तरपूर्वकं क्रियान्वयनं महत्या: वीरताया: रक्षायाश्च सच्छक्ते: प्रदर्शनमस्ति।

<u>विराम:</u>

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

<u>सर्वदलीय प्रतिनिधि मंडल यात्रा -</u>

जनता दल युनाइटेड इति दलस्य संजय-झा सांसदस्य नेतृत्वे जापानं गच्छत् सर्वदलीय-प्रतिनिधिमंडलम् अद्य जापाने तोक्यो नगरे लिबरल-डेमोक्रेटिक-पार्टीति दलस्य आतंकरोधि समिते: कार्यवाहक अध्यक्षेण पूर्व न्याय-मन्त्रिणा यासूहिरो हनाशी इत्यनेन सह मेलनं व्यदधात्। प्रतिनिधिमंडलम् आतंकवादस्य सर्वेषां रूपाणां विरोधे भारतस्य दृढं-पक्षं अप्रकाशयत् ।

संजय झा - 15 से.

अपरत्र डी.एम.के. सांसदस्य कनिमोई करूणानिधे: नेतृत्वे एकम् अन्यत् सर्वदलीयम् प्रतिनिधिमण्डलं अद्य मास्कोनगरं सम्प्राप्तवत् । रूसे भारतीय: राजदूत: विनय कुमार: प्रतिनिधिमण्डलस्य आधिकारिक गतिविधीनां प्रारम्भात् पूर्वम् भारत-रूसयो: सम्बन्धानां विभिन्ने: पक्षै: अवागमयत्।

बिहार-वैष्णवः

रेल-मन्त्री अश्विनी वैष्णवः अवदत् यत् राष्ट्रम् उन्नत-प्रौद्योगिक्या विकासेन च साकं वन्दे-भारत नमो भारत प्रभृति नूतन-रेलयानानि चालयितुम् आत्मनिर्भरम् जायते। मुङ्गेरस्य जमालपुरे एकं समारोहं सम्बोधयन् श्री-वैष्णवः अवोचत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे देशेन विगतेषु दश वर्षेषु पञ्चाशत् सहस्र किलोमीटर-यावत् रेलवे-सञ्जालस्य विद्युतीकरणं कृतम् ।

भाजपा-राहुल गांधी

भारतीय जनता पार्टीति दलेन ऑपरेशन-सिंदूर अभियानस्य सन्दर्भे प्रधानमन्त्रिणं नरेन्द्र मोदिनम् उपरि कांग्रेस-दलस्य नेतु: राहुल गांधिन: टीकाया: आलोचना कृता। दलेन प्रधानमन्त्रिण: विरोधे प्रयुक्तां गांधिन: भाषां प्रति आपत्ति: कृता। अद्य नवदिल्ल्यां दलस्य प्रवक्तु: गौरव भाटिया इत्यस्य आरोप: आसीत् यत् भारतस्य आतंकरोधिन: सफलाभियानस्योपरि कांग्रेस नेत्रा एतादृशे क्षणे तथा-टीका कृता यदा चत्वारिंशदधिक एकशत-कोटि जना: श्रीमोदिन: नेतृत्वे स्थिता: सन्ति। विश्वं प्रशंसां च करोति।

ऋतु-

ऋतु विभागेन श्व: पर्यन्तं कोंकणे गोवायां च अतिवृष्टे: अनुमानम् व्यक्तम्। ऋतु-विभाग: दक्षिण-कोंकण-कर्नाटकयो: तटीय-क्षेत्रेषु मध्य-महाराष्ट्रे गोआयां च तीव्रवृष्टे: रक्त नारङ्गी च संचेतने प्रसारिते जाते। आकाशवाणी वार्तया विशेष-वार्तायां विभागस्य वैज्ञानिक: आर.के.जेनामणि: प्रोक्तवान् यत् पूर्व-मध्य अरब-सागरस्य ऊर्ध्वे न्यून आपीडस्य क्षेत्रं गोआतटस्य समीपे अस्ति अपि च गहन आपीडने परिवर्तनस्य अनुमानम् अस्ति।

## अमरीका-ईरान वार्ता

अमरीका-ईरानयो: मध्ये अद्य इटल्या: राजधान्यां रोम-नगर्यां पञ्चम-क्रमस्य अप्रत्यक्षा वार्ता प्रारब्धा। उभयो: देशयो: मध्ये इदानी यावत् चतुर्थं वारं वार्ता संजाता। एतासु तिस्र वार्ता: ओमानस्य राजधान्यां मस्कटे संजाता:। एका च रोमे अभवत्। एषा वार्ता परमाणु कार्यक्रम विषयकं गतिरोधं अमरीकीयं प्रतिबंधं च अपाकर्तुम् वर्तते। एषा वार्ता ओमानेन कार्यते।

## मलेशिया मास्टर्स बैडमिण्टन्

बैडमिण्टन् क्रीडायां मलेशिया मास्टर्स इति स्पर्धायां भारतस्य किदाम्बी श्रीकान्त: पुरुषैकल वर्गे उपान्त्य चक्रे प्रविष्ट:। अमुना रोमाञ्चके प्रागुपान्त्यचक्रे फ्रांस देशस्य टोमा जूनियर पोपोव इत्यसौ पराजित:।

## क्रिकेट-

आई.पी.एल्. इण्डियन्-प्रीमीयर-लीग-इत्यस्यां क्रिकेट्-प्रतिस्पर्धा-मालिकायाम् अद्य रॉयल-चैलंजर्स-बैंगलूरु-दलस्य सामुख्यं सन-राइजर्स-हैदराबाद-दलेन समम् भविष्यति। इयं स्पर्धा लखनऊ नगरे सायंकाले सार्धसप्तवादने भविष्यति।

।। इति वार्ता: ।।